कौशीतकि विवाह मन्त्राः

१.२.१. अनृक्षरा ऋजवः सन्तु पन्था येभिः सखायो यन्ति नो वरेयम् ।
समर्यमा सम्भगो नो निनीयात् सं जास्पत्यं सुयममस्तु देवाः ॥

१.२.३. अनाधृष्टमस्यानाधृष्टय़ं देवानामोजाऽनभिशस्त्यभिशस्तिपा
अनभिशस्तेयमञ्जसा सत्यमुपगेषं सुविते मा धाः॥
आ नः प्रजां जनयतु प्रजापतिराजरसाय समनक्त्वर्यमा ।
अदुर्मङ्गलीः पतिलोकमा विश शं नो भव द्विपदे शं वतुष्पदे ॥
प्रजास्त्वयि दधामि । पशूंस्त्वायि दधामि । तेजो ब्रह्मवर्चस्यं त्वयि दधामि ।

१.३.२. अग्निं दधामि मनसा शिवेनायमस्तु संगमतो बहूनाम् ।
मा नो हिंसीः स्थविरं मा कुमारं शं नो भव द्विपदे शं चतुष्पदे ॥

१.४.५. सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः ॥

१.५.२६. अग्निर्जनिना स मेऽमूं जायां ददातु स्वाहा । सोमो जनिमान् स मामुया
जनिमन्तं करोतु स्वाहा । पूषा ज्ञातिमान् स मामुष्यै पित्रा मात्रा
भ्रातृभिर्ज्ञातिमन्तं करोतु स्वाहा ॥

१.६.७. हुतोऽग्निहोत्रहोमेनाऽहुतो बलिकर्मणा ।
प्रहुतः पितृकर्मणा प्राशीतो ब्राह्मणे हुतः ॥
अनूर्ध्वज्ञु र्व्यूळजानुर्जुहुयात् सर्वदा हविः ।
न हि बाह्यहुतं देवाः प्रतिगृह्णन्ति कर्हिचित् ॥
रौद्रं तु राक्षसं पित्र्यमासुरं चाऽऽभिचारिकम् ।
उक्त्वा मन्त्रं स्पृशेदप आलभ्यात्मानमेव च ॥

१.८.२. रैभ्यासीदनुदेयी नाराशंसी न्योचनी ।
सूर्याय भद्रमिद्वासो गाथयैति परिष्कृतम् ॥

१.८.३. युवं वस्त्राणि पीयसा वसाथे युवोरच्छिद्रा मन्तवो ह सर्गाः ।
अवातिरतमनृतानि विश्व ऋतेन मित्रावरुणा सचेथे ॥

१.८.४. चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम् ।
द्योर्भूमिः कोश आसीद् यदवत् सूर्या पतिम् ॥

१.८.५. समञ्जन्तु विश्वे देवाः समापो हृदयानि नौ ।
सं मातरिश्वा सं धाता समु देष्ट्री दधातु नौ ॥

१.८.६. यथेयं शचीं वावातां सुपुत्रां च यथादितिम् ।

अविधवां चापालामेवं त्वमिह रक्षत ॥
१.८.७. रूपं रूपं प्रतिरूपो बभूव तदस्य रूपं प्रतिचक्षणाय ।
इन्द्रो मायाभिः पुरुरूप ईयते युक्ता ह्यस्य हरयः शता दश ॥
१.८.८. नीललोहितं भवति कृत्यासक्तिर्व्यज्यते ।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ॥
१.८.९. मधुमतीरोषधीर्द्याव आपो मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान् नो अस्त्वरिष्यन्तो अन्वेनं चरेम ॥
१.८.१३. ब्रहस्पतये त्वा मह्यं वरुणो ददातु । सोऽमृतत्वमशीय ।
त्वद्राष्ट्रयोरधिमयो मह्यं प्रतिगृह्णते ॥
१.८.१४. सम्राज्ञी श्वशुरे भव सम्राज्ञी श्वश्रां भव ।
ननान्दरि सम्राज्ञी भव सम्राज्ञी अधि देवृषु ॥
१.८.१७. गृभ्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः ।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥
१.८.१८. अमोऽहमस्मि सा त्वं सा त्वमस्यमोऽहम् ।
द्योरहं पृथिवी त्वं सामाहमृक्त्वं तावेहि विवहावहै ।
प्रजां प्रजनयावहै पुत्रान् विन्दावहै बहूस्ते सन्तु जरदष्टयः ॥
१.८.२०. एह्याश्मानमातिष्ठ । आरोहाश्मेव त्वं स्थिरा भव ।
अभितिष्ठ पृतन्यतः । सहस्व पृतनायतः ॥
विश्वा उत त्वया वयं धारा उदन्या इव । अतिगाहेमहि द्विषः ॥
१.८.२३. इयं नार्युपब्रूतेऽग्नौ लाजानावपन्तिका ।
शिवा ज्ञातिभ्यो भूयासं चिरं जीवतु मे पतिः ॥
१.८.२८. इष एकपदी । विष्णुस्त्वा नयतु । ऊर्जे द्विपदी । विष्णुस्त्वा नयतु ।
रायस्पोषाय त्रिपदी । विष्णुस्त्वा नयतु । मायो भव्याय चतुष्पदी । विष्णुस्त्वा नयतु । प्रजाभ्यः पञ्चपदी । विष्णुस्त्वा नयतु । विष्णुस्त्वा नयतु । ऋतुभ्यः षट्पदी । विष्णुस्त्वा नयतु । सखा सप्तपदी भव' इति । विष्णुस्त्वा नयतु ॥
१.८.२९. आपो हि ष्ठा मयोभुवस्ता न ऊर्जे दधातन । महे रणाय चक्षसे ॥
यो वः शिवतमो रसस्तस्य भाजयतेह नः । उशतीरिव मातरः ॥
तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥
१.९.१. प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवः ।

ऋतस्य योनौ सुकृतस्य लोकेऽरिष्टां त्वा सह पत्या दधामि ॥
१.९.२. जीवां रुदन्ती विमयन्तो अध्वरे दीर्घामनुप्रसितिं दीधियुर्नरः ।
वामं पितृभ्यो य इदं समेरिरे मयः पतिभ्यो जनयः परिष्वज ॥
१.९.३. अभि व्ययस्व खादिरस्य सारमोजो धेहि स्पन्दने शिंशपायाम् ।
अक्ष वीडो वीडित वीडयस्व मा यामादस्मादव जीहपो नः ॥
१.९.४. शुची ते चक्रे यात्वा व्यानो अक्ष आहतः ।
अनो मनस्मयं सूर्याऽऽरोहत् प्रयती पतिम् ॥
द्वे ते चक्रे सूर्ये ब्रह्मणा ऋतुथा विदुः ।
अथैकं चक्रं यद्गुहा तदद्धातय इद्विदुः ॥
१.९.७. खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
अपालमिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥
युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो ।
तेन जायामुप प्रियां मन्दानो याह्यान्धसो योजा न्विन्द्र ते हरी ॥
१.९.८ सुकिँशुकँ शल्मलिं विश्वरूपँ हिरण्यवर्णँ सुधुरँ सुचक्रम् ।
आरोह सूर्ये अमृतस्य लोकं स्योनं पत्ये वहतुं कृणुष्व ॥
१.९.१०. मा विदन्परिपन्थिनो य आसीदन्ति दम्पती ।
सुगेभिर्दुर्गमतीतामप द्रान्त्वरातयः ॥
१.९.११. ये वध्वश्चन्द्र वहतुं यक्ष्मा यन्ति जनादनु ।
पुनस्तान्यज्ञिया देवा नयन्तु यत आगताः ॥
१.९.१७. इह प्रियं प्रजाया ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं सं सृजस्वाधा जिव्री विदथमा वदाथः ॥
परा देहि शामुल्ये ब्रह्माभ्यो वि भजा वसु ।
कृत्येषा पद्वती भूत्व्या जाया विशते पतिम् ॥
अश्रिरा तनूर्भवति रुशति पापयामुया ।
पतिर्यद्वध्वो वाससा स्वमङ्गमभिधित्सते ॥
सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्त्वायाथास्तं विपरेतन ॥
इमां त्वमिन्द्र मीढ्वस्सुपुत्रां सुभगां कुरु ।
दशाभ्यां पुत्रानाधेहि पतिमेकादशं कृधि ॥

१.१०.१. अग्निना देवेन पृथिवीलोकेन लोकानामृग्वेदेन वेदानां त्वा शमयाम्यसौ स्वाहा ।
वायुना देवेनान्तरिक्षेण लोकेन लोकानां यजुर्वेदेन वेदानां तेन त्वा शमयाम्यसौ
स्वाहा । सूर्येन देवेन दिवो लोकेन लोकानां सामवेदेन वेदानां तेन त्वा
शमयाम्यसौ स्वाहा । चन्द्रेण देवेन दिशां लोकेन लोकानां ब्रह्मदेवेन वेदानां तेन
त्वा शमयाम्यसौ स्वाहा ॥

१.१०.२. भूर्या ते पतिघ्न्यलक्ष्मी देवरघ्नी जारघ्नी तां करोमि तेऽसौ ॥

१.१०.६. अघोरचक्षुरपतिघ्न्ये धि शिवा पशुभ्यः सुमना सुवर्चाः ।
वीरसूर्देवकामा स्योना शं नो भव द्विपदे शं चतुष्पदे ॥
कया नश्चित्र आभुवदूती सदावृधः सखा । कया शचिष्ठया वृता ॥
कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः । दृळहा चिदारुजे वसु ॥
अभी षु णः सखीनामविता जरितृणाम् । शतं भवास्यूतिभिः ॥
उता त्या दैव्या भिषजा शं नः करतो अश्विना । युयुयातमितो रपो अप स्रिधः ॥

१.१०.१३. ध्रुवैधि पोष्या मयि मह्यं त्वादाद्बृहस्पति ः ।
मया पत्या प्रजावती सं जीव शरद शतम् ॥
ध्रुवं पश्यामि प्रजां विन्देय ॥

१.१०.१४. दधिक्राण्वो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण आयूंषि तारिषत् ॥

१.२०.२४. पुमांसौ मित्रावरुणौ पुमांसावश्विनावुभौ ।
पुमानिन्द्रश्चाग्निश्च पुमांसं वर्धतां मयि पुनः ॥

१.११.४. अग्ने प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि ।
यास्याः पतिघ्नी तनूस्तामस्या अप जहि ।
वायो प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि ।
यास्याः अपुत्रिया तनूस्तामस्या अप जहि ।
सूर्यं प्रायश्चित्तिरसि त्वं देवानां प्रायश्चित्तिरसि ।
यास्याः अपशव्या तनूस्तामस्या अप जहि ।
अर्यमणं नु देवं कन्या अग्निमयक्षत ।
सोमां देवो अर्य्यमा प्रेतो मुञ्चातु मामुतः ॥
वरुणं नु देवं कन्या अग्निमयक्षत ।
सोमां देवो वरुण प्रेतो मुञ्चातु मामुतः ॥

पूषणं तु देवं कन्या अग्निमयक्षत ।
सोमां देवः पूषा प्रेतो मुञ्चातु मामुतः ॥